THE ŚRAUTA SŪTRA OF ĀPASTAMBA

BELONGING TO THE
TAITTIRĪYA SAṂHITĀ
WITH THE
COMMENTARY OF RUDRADATTA

EDITED BY
Dr. Richard Garbe

With new appendix containing corrections and emndations to the text by
Dr. C. G. Kashikar

Volume I

Praśnas 1-7

Munshiram Manoharlal Publishers Pvt. Ltd.

saṃdhi, so far as these violations served in lieu of a slight punctuation, or marked a break in the sense, or were intended to secure greater clearness.

It may be well to mention, that the MSS. of the commentary for the most part read बैाधायन, while I have uniformly written बौधायन in the edition.

Unfortunately, as the list of errata shows, a number of typographical errors have remained uncorrected. These, I hope, the reader will excuse in view of the great distance of my abode, Königsberg, from the place of printing, Calcutta. I found that I must either content myself with the revision of a single proof, or face the unpleasant alternative of an indefinite postponement of the completion of the publication. Even under these circumstances, the present edition is—I venture to hope—satisfactorily correct. And for this I have to thank the carefulness of the skilful compositor, and especially the great kindness of Dr. Hoernle, who voluntarily assumed the labour of regularly reading the second proof.

R. GARBE.

Königsberg, May 1882.

आपस्तम्बीयं श्रौतसूत्रम् ।

श्रीगणेशाय नमः ।

ओम् ॥

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
आज्ञा श्रुतिस्मृती यस्य यस्य यज्ञाः सभाजनम् ।
नमः परस्मै विश्वस्मात्तस्मै श्रीवत्सवक्षसे ॥
आदिमं ब्रह्मणः कोशमध्यस्थितपरावरम् ।
अपास्तशेषपाप्मानमापस्तम्बं मुनिं स्तुमः ॥
आपस्तम्बीयसूत्रार्थे ऽप्यन्यथाज्ञानसंशयान् ।
सूत्रदीपिकया वृत्त्या रुद्रदत्तः परास्यति ॥
सन्तु ये सुविवक्तारः सन्तः स्वगुणसाक्षिणः ।
रत्नं रत्नमिति ग्राह्यं मूल्यं किं तस्य गृह्यते ॥

अथ भगवानापस्तम्बः समस्तलोकहितकाङ्क्षी विध्यर्थवादमन्त्रात्मकविविधवेदभागव्याकीर्णं विभक्तानेकशाखाख्यासक्तं च विश्वस्य त्रैतानिकस्य कर्मणो याजुर्वैदिकं प्रयोगं व्याचिख्यासुस्तत्र सर्वप्रथमभाविनोऽग्न्याधेयस्य चेष्टिकत्वात्सर्वेष्टीनां च दर्शपूर्णमासप्रकृतित्वात्समाम्नाये च दर्शपूर्णमासमन्त्राणामेव प्राथम्यात्तावेवाग्रे व्याख्यास्यन्नधिकारं दर्शयति ॥

अथातो दर्शपूर्णमासौ व्याख्यास्यामः । १ ।

अथातःशब्दो ऽयं प्रकरणारम्भे प्रायः प्रयुज्यते । दृष्टः क्वचिदानन्तर्ये ऽपि यथा इमे भगवो व्याख्याता अथातोऽङ्गिरसामित्यादौ । न पुनरिहानन्तर्यार्थः वृत्तस्य कस्यचिदनन्तरस्यानुपलम्भात् ॥ न दृश्यते ऽस्मिंश्चन्द्रमा इति विपरीतलक्षणया दर्श इत्यमावास्योच्यते । न ह्यियमन्वर्थसंज्ञेति चन्द्रदर्शनस्य सर्वतिथिसाधारणात्। न च सूर्येण संगतो दृश्यत इति विशेष्टव्यं सूर्यसंगतेरमावास्याशब्दप्रवृत्तिहेतोर्दर्शनात् । अमा सह वसतोऽस्यां चन्द्रार्काविति वाच्यम् ॥ अतितेजस्विसूर्यमण्डलान्तर्विलीनः क्षीणकलश्चन्द्रमाः सिद्धैरेव दृश्यते नास्मद्विधैरिति । तथापि सिद्धदर्शनस्याविशेषकत्वादस्मद्दर्शनपरिसंख्यापर एवशब्दोऽभ्युपगन्तव्य इति स एवार्थश्छन्दसोक्तः स्यात् । न चासौ प्राञ्जलः विवक्षिततिरोधानात् । सूचकत्वेव विपरीतलक्षणया विवरणाच्च । यथा यदहर्न दृश्यते तदहरमावास्येति । तस्माद्यथोक्त एवार्थः शोभते ॥ मासश्चन्द्रः यदाहुर्नैरुक्ताः मासो मानात्कालश्चन्द्रश्चेति । स पूर्यते यस्मिंस्तदहः पूर्णमासः । दर्शश्च पूर्णमासश्च दर्शपूर्णमासौ ॥ इह च दर्शपूर्णमासाख्यकालचोदितानामाग्नेयादिप्रधानानां यौ विद्द्वाक्यानुवन्दितौ समुदायौ य एवं विद्वान्पौर्णमासीं य एवं विद्वानमावास्यामिति तयोरपि तत्तत्कालसंबन्धेन दर्शपूर्णमासाविति नामनी॥ तत्र पूर्णमासस्य प्रयोगतः प्रथमत्वेऽपि दर्शशब्दस्याल्पाच्तरत्वात्पूर्वनिपातः ॥ तौ व्याख्यास्यामः । श्रुतौ संक्षिप्तयोर्व्याकरणेन शाखान्तरोपसंहारादिना च विस्पष्टीकरणं व्याख्यानम् ॥

प्रातरग्निहोत्रं हुत्वान्यमाहवनीयं प्रणीयाग्नीनन्वादधाति । २ ।

अन्वाधानं नामाग्नौ काष्ठाधानं तच्च कर्माङ्गत्वेन सुरथादिगुणविशिष्टानामग्नीनां ग्रहणार्थं तद्द्वारेण देवतापरिग्रहार्थं च । कुतः । अग्निं गृह्णामि सुरथं यो मयोभूः स्व आयतने देवताः परिगृह्णामीति कर्मविधिवाक्यशेषाभ्यामग्निं गृह्णाति देवताश्च परिगृह्णाति स्व आयतन इति मन्त्रलिङ्गात् तथा ममाग्ने वर्चो विहवेष्वस्त्विति पूर्वमग्निं गृह्णाति तूष्णीमितराविति भारद्वाजवचनाच्च ॥ प्रातरग्निहोत्रं हुत्वेत्यनुवाद आनन्तर्यार्थः यथौपवसथ्ये ऽह्नि प्रातरग्निहोत्रं हुत्वा प्रागेवान्येभ्यः कर्मभ्यो ऽन्वादध्यात् मा बिलम्बिष्ट मा चाहुते ऽन्वादध्यादिति । अविलम्बश्च ब्राह्मणे प्रशस्यते यो वै देवताः पूर्वः परिगृह्णातीति । मन्त्रवर्णश्च भवति तान्देवान्परिगृह्णामि पूर्व इति ॥ अर्थादन्यत्वे सिद्धे ऽन्यमाहवनीयं प्रणीयेति किमर्थम् । दर्शपूर्णमासावारभमाणस्य चतुर्होत्रर्थाग्न्युद्धारार्थमिति केचित् । तदयुक्तं सर्वदर्शपूर्णमासप्रयोगसाधारणस्यैव तन्त्रस्याधिकारात्। तत्र नामैतद्वक्तव्यं यत्र तयोरारम्भो ऽभिधायिष्यते वक्ष्यन्ते च तद्विशेषिका धर्मास्तत्रैव दर्शपूर्णमासावारप्स्यमान इत्यादिना । तस्मान्न तदर्थं वचनम् । किमर्थं तर्हि । माग्निहोत्रार्थो ऽग्निरन्वाधायीति । कः प्रसङ्गः । अस्ति परमतेन । यथाह भारद्वाजः य एवैषो ऽग्निरग्निहोत्राय प्रणीतस्तं गृह्णीयादित्याश्मरथ्यो ऽन्यं प्रणीयेत्यालेखन इति॥ दक्षिणाग्नेरन्वाहार्यस्याधानक्रमेणार्थसिद्धा स्वयोनित उत्पत्तिः ॥

न गतश्रियो ऽन्यमग्निं प्रणयति । ३ ।

अनुसंधास्यति स्वयमेव गतश्रीशब्दार्थम् । तस्यान्यं न प्रणयेत् । नन्विदमपार्थकं वचनं नित्यो गतश्रियो भ्रियत इत्यनेनैव सिद्धत्वात् । सत्यमत्रापार्थकम् । वरुणप्रघासेषु तु दक्षिणविहारार्थं भविष्यतीत्येके । सम्यक्तावदुक्तमिदम् । यद्दर्शपूर्णमासौ व्याख्यास्याम इत्यधिकृत्य वरुणप्रघासा व्याख्यायन्त इति पर्यनुयोगः प्रत्यवस्थिष्यते न्यायत एव च तत्र प्रणयनप्रसङ्गः । तस्मादनन्तरेणैव प्रणयनानुवादेन गतश्रियो ऽप्यन्वाधास्यतोऽन्यः प्रणेतव्य इति मा कश्चिद्ब्रवीदिति सिद्धस्यैवायमनुवादः स्पष्टत्वाय कथनमिति । नन्वेवमपि न गतश्रियः प्रणयतीत्येतावदवक्तव्यम् । किमन्यग्रहणेनाग्निग्रहणेन वा । इदं तावदग्रेविदां कुर्वन्तु तत्र भवन्तः यन्नातिसूक्ष्मेक्षिकया शैल्या शब्ददरिद्रः सूत्रकारः किं तर्हि व्यक्ताभिर्वचनव्यक्तिभिरर्थान्व्याचष्ट इति । तदलमनेनाक्षेपक्लेशेन ॥

देवा गातुविदो गातुं यज्ञाय विन्दत । मनसस्पतिना देवेन वाताद्यज्ञः प्रयुज्यतामिति जपित्वा ममाग्ने वर्चो विहवेष्वस्त्वित्याहवनीयमुपसमिन्द्धे । उत्तरया गार्हपत्यमुत्तरयान्वाहार्यपचनम् । ४ ।

अन्वाधानाधिकारात्तस्याङ्गं जपः । तेन प्रायणीयादौ निवर्तते । उपसमिन्द्धे काष्ठैर्दीपयति ॥ तत्र त्रीणित्रीणि काष्ठान्यादधीतेति बौधायनः । समिध आदधातीति कात्यायनः ॥

तिसृभिस्तिसृभिर्वा । ५ ।

विहव्यानुवाकस्य दशर्चस्य तिसृभिस्तिसृभिर्ऋग्भिस्त्रीनेतानग्नीन्सकृत्सकृदुपसमिन्द्धे ॥

उत्तमां तु जपेदाहवनीये वादध्यात् । ६ ।

तदा तूत्तमां दशमीं जपेत् । तया पुनराहवनीये काष्ठानि वादध्यात् ॥

व्याहृतीभिरन्वाधानमेके समामनन्ति । ७ ।

एकैकया व्याहृत्या तानेवाग्नीन्गार्हपत्याद्याहवनीयान्तानेकैकमुपसमिन्द्धे । कुत एतत् । वाजसनेयिनां तथाम्नानात् महाव्याहृतिभिर्वा प्राक्संस्थमिति कात्यायनवचनात् आधाने च तस्यतस्याग्नेस्तत्तद्व्याहृतिसंबन्धप्रसिद्धेः स्वयमाहृणासु समस्तोपदिष्टानामपि विभागप्रदर्शनाच्च ॥ सभ्यावसथ्यावप्यत्र तूष्णीमुपसमिन्धनीयौ । तत्तु याजमाने दर्शयिष्यामः ॥

संनयतः पलाशशाखां शमीशाखां वाहरति बहुपर्णां बहुशाखामप्रतिशुष्काग्रामसुषिराम् । ८ ।

सांनाय्ये नाम दार्शिके दधिपयसी ताभ्यां प्रवृत्तेज्यः संनयन्नित्युच्यते ॥

यं कामयेतापशुः स्यादित्यपर्णां तस्मै शुष्काग्रामाहरेदपशुरेव भवति । यं कामयेत पशुमान्स्यादिति बहुपर्णां तस्मै बहुशाखामाहरेत्पशुमन्तमेवैनं करोतीति विज्ञायते । ९ ।

यं कामयेतापशुः स्यादित्यगुणाया वर्जनार्थं न लब्धर्युकामवशात्तस्या एव ग्रहणार्थम् । कुतः । यजमानपरिक्रीतस्यर्त्विजस्तदहिते प्रवर्तनायोगात् यं कामयेतापशुः स्यादिति पराचीं तस्येतुक्तं यदाभ्यास-

प्रतिषेध इति सूत्रकारवचनाच्च॥ यत्र प्रतिपादनीयेऽर्थे ब्राह्मणं प्रदर्शयति तत्र विज्ञायत इत्याहेत्यनुसंधातव्यम्॥

सा या प्राच्युदीची प्रागुदीची वा भवतीषे त्वोर्जे त्वेति तामाच्छिनत्ति। १०।

सा एवंगुणा आहार्या शाखा यस्य वृक्षस्य प्रागादिषु दिक्षु प्रवृत्ता भवति तामाच्छिनत्तीत्यर्थः। भवत्यन्तेन वाक्यं भेत्तव्यम्। या प्राची सा भवतीति वान्वयः॥

अपि वेषे त्वेत्याच्छिनत्त्यूर्जे त्वेति संनमयत्यनुमार्ष्टि वा। ११।

संनमयत्यृजुकरोति वक्रत्वे। इतरथानुलोममनुमार्ष्टि॥

इति प्रथमा कण्डिका।

इमां प्राचीमुदीचीमिषमूर्जमभिसंस्कृतां बहुपर्णामशुष्काग्रां हरामि पशुपामहमित्याहरति। १।

प्रागुदीचीलिङ्गत्वेऽपि मन्त्रस्य प्राच्युदीच्योरपि शाखयोरनिवृत्तिः शाखाजात्यभिप्रायेण तत्तदभिधानोपपत्तेः॥

वायव स्थोपायव स्थेति तया षडवरार्ध्यान्वत्सानपाकरोति। २।

अर्धशब्दोऽत्र स्थानवाची यथास्यार्धं वव्राज त्रिर्दक्षिणार्धमित्यादौ।

येषामवरे स्थाने षट्संख्या भवति ते षडवरार्ध्याः। तानपाकरोति मातृभ्यः पृथक्करोति मातृसंगतानां वत्सानां युगपद्रूपाकरणीयत्वात्॥ प्रतिवत्सं मन्त्रावृत्तिः। बहुवचनं तु मन्त्रगतमुपरवमन्त्रवत्सर्वापेक्षं द्रष्टव्यम्॥

दर्भैर्दर्भपुञ्जीलैर्वा। ३।

पुञ्जीलं स्तम्बः॥

देवो वः सविता प्रार्पयत्विति शाखया गोचराय गाः प्रस्थापयति। ४।

गावो यत्र चरन्ति तस्मै देशाय यथासमाम्नातेनाघशंसान्तेन मन्त्रेण गाः सर्वा निष्कासयति॥ वत्सविनाकृतानां गवां युगपच्छक्यनिष्कासनत्वान्नावृत्तिर्मन्त्रस्य। यत्र तु न शक्यते तत्रावृत्तिः॥

प्रस्थितानामेकां शाखयोपस्पृशति दर्भैर्दर्भपुञ्जीलैर्वा। ५।

गतः॥ अथ देवो व इत्यादेः प्रस्थापनमन्त्रस्यैव शाखान्तरीयौ कौचित्पाठविकारौ दर्शयति॥

आप्यायध्वमघ्निया इन्द्राय देवभागमित्येके समामनन्ति। महेन्द्रायेत्येके। ६।

आप्यायध्वमघ्निया देवभागमिति यथासमाम्नातेन पाठेन द्विप्रकारोऽयं पाठो विकल्पते॥ अथानयोः पाठयोः सर्वत्र तुल्यवद्विकल्पे प्राप्ते व्यवस्थासिद्ध्यर्थं सामान्येनेन्द्रमहेन्द्रशब्दयोर्देवतापरयोः प्रयोगव्यवस्थामाह॥

इन्द्रं निगमेषूपलक्षयेदिन्द्रयाजिनो महेन्द्रं महेन्द्रयाजिनः। ७।

निगम्यन्ते येषु हविषः प्रतियोगित्वेन रूपेण देवतास्ते मन्त्रा निगमाः। तेषु सांनाय्यदेवता। निगमे इन्द्रयाजिनो यजमानस्येन्द्रं निर्दिशेत् महेन्द्रयाजिनो महेन्द्रमित्यर्थः॥ एतेन चानन्तरोक्तौ प्रयोगविकल्पावन्ये च कामधुच इत्यादयो निगमा व्याख्याता भवन्ति। एतदेवाभिप्रेत्य निगमेष्विति बहुवचनं कृतमिति वेदितव्यम्॥

शुद्धा अपः सुप्रपाणे पिबन्तीः शतमिन्द्राय शरदो दुहानाः। रुद्रस्य हेतिः परि वो वृणक्तिति प्रस्थिता अनुमन्त्रयते। ८।

अनुपूर्वो ऽभिपूर्वश्च मन्त्रयतिस्तदभिसंधाय मन्त्रोच्चारणे प्रयुज्यते। अभिपूर्वस्तु तस्मिन्नेवाभिमुख्याधिक इत्यपरम्॥ अत्र केचिच्छतमिन्द्रायेति निगमे महेन्द्रयाजिनो महेन्द्रोपलक्षणं निषेधन्ति। तन्नु न मृष्यामहे पूर्वसूत्रविरोधात्। न चास्यानिगमत्वं शङ्कनीयं इन्द्राय दुहाना इति दोहदेवतासंबन्धस्य प्रयोगसमवायिनो ऽभिधानात्। तथा च शतमिन्द्रायेति प्रकृत्याह भारद्वाजः महेन्द्रायेति वा यदि महेन्द्रयाजी भवतीति॥

ध्रुवा अस्मिन्गोपतौ स्यात बह्वीरिति यजमानस्य गृहानभिपर्यावर्तते। ९।

अभिपर्यावर्तते अभिमुखः प्रतिनिवर्तते॥

यजमानस्य पशून्पाहीत्यग्निष्ठे ऽनस्यग्न्यगारे वा पुरस्तात्प्रतीचीं शाखामुपगूहति पश्चात्प्राचीं वा। १०।

अग्निसमीपस्थमनो ऽग्निष्ठं यद्दृश्यति प्रकटमवस्थितं भवतीति। तस्मिन्नग्न्यगारे वा पुरस्तात्प्रतिपद्य प्रत्यग्गतामुपगूहति पश्चाद्वा प्रतिपद्य प्राग्गतामित्यर्थः। पुरस्ताद्भागे ऽनसः प्रत्यगग्रां पश्चाद्भागे ऽनसो वा प्रागग्रामित्यन्ये॥ शाखानिधानं भाव्युपयोगार्थं न वत्सापाकरणशेषः। तेन पशावपि भवत्येव॥ अथेदानीमुत्तरोत्तरेष्वनुष्ठेयेष्वृत्विजामप्रमादार्थं कर्मानुसंधानप्रशंसां ब्राह्मणोक्तामुदाहरति॥

यो वा अध्वर्योर्गृहान्वेद गृहवान्भवति। आ चतुर्थात्कर्मणो ऽभिसमीक्षेतेदं करिष्यामीदं करिष्यामीत्येते वा अध्वर्योर्गृहाः। य एवं वेद गृहवान्भवतीति विज्ञायते। ११।

यो ऽध्वर्युरध्वर्योर्गृहान्वेद स गृहवान्भवति। के ते ऽध्वर्योर्गृहाः। अग्नीनन्वाधास्यामि शाखामाहरिष्यामीत्येवमा चतुर्थात्कर्मणो ऽभिसमीक्ष्य ये ऽनुसंधीयन्ते पदार्थास्ते ऽध्वर्युगृहाः। य एवं वेद य एते ऽध्वर्युगृहा इति वेद सो ऽपि गृहवान्भवतीत्यर्थः। तत्र तु वेदनस्य परार्थत्वात्फलवचनं प्ररोचनार्थं यथा यो वा अध्वर्योः प्रतिष्ठां वेद यो वा अध्वर्योः स्वं वेद यो वा अध्वर्योरायतनं वेदेत्यादौ। ततश्चैवं न शङ्कितव्यं यजमानस्यैवेदमेवंविदुषः फलमिति॥ चतुर्थग्रहणं यावच्छक्यस्योपलक्षणं अनुसंधानाधिक्ये गुणाधिक्यात्। तथाध्वर्युग्रहणमपि सर्वर्त्विजामुपलक्षणं उपयोगसाम्यात्॥

इति द्वितीया कण्डिका। इति प्रथमः पटलः॥

उत्तरेण गार्हपत्यमसिदो ऽश्वपर्शुरनडुत्पर्शुर्वा निहिता। १।

असिदो दात्रम्। पर्शुः पार्श्वास्थि॥

देवस्य त्वा सवितुः प्रसव इत्यसिदमश्वपर्शुं वादत्ते तूष्णीमनडुत्पर्शुम्। २।

गतौ॥

यज्ञस्य घोषदसीति गार्हपत्यमभिमन्त्र्य प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इत्याहवनीये गार्हपत्ये वासिदं प्रतितपति। ३।

यदाप्याहवनीये प्रतितपति तदाप्यभिमन्त्रणं गार्हपत्यस्यैव प्रतितपन एव विकल्पवचनात्॥

न पर्शुम्। ४।

प्रतितपतीति शेषः। अत एव प्रतिषेधाज्जानीमो यदेकत्रानेकसाधनविकल्पेषु मुख्ये कृतो विधिः सर्वार्थो भवतीति॥

प्रेयमगादित्युक्त्वोर्वन्तरिक्षमन्विहीति प्राचीमुदीचीं वा दिशमभिप्रव्रज्य यतः कुतश्चिद्दर्भमयं बर्हिराहरति। ५।

प्रथमं विहारात्प्राचीमुदीचीं वा दिशमभिप्रव्रज्य ततो यतः कुतश्चिद्दिशो दर्भमयं बर्हिराहरति यतो लभ्यते॥ बौधायनस्त्वाह आहवनीयादेवाये चीत्वा चतुरो वा प्राचः प्रक्रमान्प्रक्रम्याथ तां

दिशमभिप्रव्रजेद्यत्र बर्हिर्वेत्स्यन्मन्यत इति॥ प्रेयमगादित्यपि गमनमन्त्र एव तल्लिङ्गत्वात् यौ गमनावित्युत्तरत्रानुवादाच्च। किमर्था तर्ह्युक्त्वेत्यधिकोक्तिः। उच्यते मन्त्रसमाम्नाये हि द्वितीयो मन्त्रः प्रत्यागमनक्रमे पठितो न गमनक्रमे। कल्पान्तरकारैश्च तावुभयत्र व्यवस्थया विकल्पेन च विनियुक्तौ। आचार्यस्तूभयोरुभयत्र समुच्चयं मन्यते। तेन यत्नं कृतवानेतत्प्रथममुक्त्वा ततो ऽनेन प्रव्रजतीति॥ अथवा यतः कुतश्च बर्हिराहरणे ऽपि पुरस्ताद्बर्हिरासद इति मन्त्रार्थवशेन पुरस्तादाहरणगुणसिद्धिर्ब्राह्मणे दर्शिता। अथो यदेतदुक्त्वा यतः कुतश्चाहरति तत्प्राच्या एव दिशो भवतीति तस्यैवार्थमनुकरोत्याचार्यः प्रेयमगादित्युक्त्वा यतः कुतश्चाहरतीति॥ स चायं मन्त्रः स्त्रीलिङ्गादसिदे नीयमाने निवर्तत इति केचित्। तदयुक्तं तूष्णीमनडुत्पर्शुं न पर्शुमिति पर्श्वसिदयोरभिप्रेतविशेषवचनादवचनाच्चात्र विशेषस्य। न च स्त्रीलिङ्गविरोधः धिषणाभिधानात् यथोक्तं ब्राह्मणे विद्या वै धिषणा विद्ययैवैनदच्छैतीति। यदपि पर्शुविधानबलाद्धिषणाशब्दो गुणवृत्त्या पर्श्वभिधायीष्यते तथैवेष्यतामसिदे ऽपि। न च तत्रासिदे वैलिङ्ग्यं दोषाय धिषणात्वेन तस्योपचारात् असिदाकृतिविवक्षया व्यत्ययेन वा स्त्रीलिङ्गोपपत्तेः। यदप्यस्याविशेषणं मनुना कृतेत्यादि तदप्यविशिष्टमेवोभयोस्तस्मादनिवृत्तिरुभयत्रापि मन्त्रस्य॥

देवानां परिषूतमसीति दर्भान्परिषौति। ६।

परिषौति यावता पर्याप्तं तावत्परिगृह्णाति॥

विष्णो स्तूपो ऽसीत्यभिप्रेतानामेकं स्तम्बमुत्सृजति। ७।

तेषां लाव्यत्वेनाभिप्रेतानां मध्ये स्तम्बं लेकमुत्सृजति यथा न लूयते तथा बहिष्करोतीत्यर्थः ॥

एकं वा स्तम्बं परिषूय तं सर्वं दाति । ८ ।

एकमूलप्रभवो दर्भसमूहः स्तम्बः । तावत्सर्वं छिनत्ति न तु किंचिदुत्सृजति । अन्ये त्वपरिषूता एव लूयन्त इत्यर्थः ॥

अतिसृष्टो गवां भाग इति वैकां द्वे तिस्रो वा नाडीरुत्सृजति । ९ ।

नाडी शलाका ॥

इदं देवानामिति परिषूतानभिमृशति । इदं पशूनामित्यतिसृष्टान् । १० ।

अनुत्सर्गपक्षे ऽपि भवत्येव परिषूतस्तम्बाभिमर्शनं बर्हिःसंस्कारत्वात् ॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां बर्हिर्देवसदनमारभ इति विशाखेषु दर्भानारभते । ११ ।

विशाखाः प्रकाण्डादूर्ध्वभागाः । यतः शलाकाः पृथग्भवन्ति तेष्वारभते आलभते स्पृशतीति यावत् ॥

देवबर्हिर्मा त्वान्वङ्मा तिर्यगिति संयच्छति । १२ ।

संयच्छति लवनानुगुणं सव्यमुष्टिना गृह्णाति ॥

पर्व ते राध्यासमित्यसिदमधिनिदधाति । १३ ।

पर्वणि निदधाति यत्पश्चिम दिनं तद्देवानामिति श्रुतेः पर्व ते राध्यासमिति मन्त्रवर्णाच्च ॥

आच्छेत्ता ते मा रिषमित्याच्छिनत्ति । १४ ।

गतः ॥

संनखं मुष्टिं लुनोति । १५ ।

संनखं संगताङ्गुल्यङ्गुष्ठनखं तावत्प्रमाणमित्यर्थः ॥ लुनोति लुनाति विकरणव्यत्ययः ॥

स प्रस्तरः । १६ ।

यो ऽयं प्रथमलूनो मुष्टिः प्रस्तरः समाख्यायते ॥

कुल्मिमात्रो ऽरत्निः प्रादेश ऊर्वस्थि जान्वस्थि स्रुग्दण्ड इति वा तिर्यक्प्रमाणानि । १७ ।

कुल्मिर्गोवालः । अरत्निर्हस्तस्य पूर्वभागः । प्रादेशः प्रदेशिन्यङ्गुष्ठयोरायामः । स चात्र सामर्थ्यात्संनखवन्मण्डलीकृतः संनिवेशो गृह्यते ॥ अरत्नि प्रादेश इति पठतां विसर्जनीयः प्रमादभ्रष्टः ॥ ऊरोरस्थि ऊर्वस्थि । तिर्यक्प्रमाणानि स्थौल्यप्रमाणानि । तानि च संनखप्रमाणेन विकल्पन्ते ॥

इति तृतीया कण्डिका ।

पृथिव्याः संपृचः पाहीत्यनधो निदधाति । १ ।

अनधः अभूमौ ॥

अयुजो मुष्टींल्लुनोति । २ ।

अयुजः अयुग्मान् ॥

तथा निधनानि । ३ ।

निधनानि मुष्टीनां राशयस्तानि चायुञ्जि भवन्तीत्यर्थः ॥

तेषां प्रस्तरो ऽयुगर्थ इत्येके । ४ ।

तेषां मुष्टीनां निधनानां च प्रस्तरेण विनायुग्मानां सतां प्रस्तरो ऽयुगर्थः अयुग्मावार्थः न तु प्रस्तररहितानामयुक्तमित्येके मन्यन्ते । न तथा वयमिति भावः । कथं तर्हि यूयं मन्यध्वे । अत आह ॥

प्रस्तरे याथाकामी । ५ ।

प्रस्तरे अयुगर्थत्वं प्रति याथाकामी याथाकाम्यं सह वा प्रस्तरेणायुक्तमस्तु विना वा प्रस्तरेण । न त्वेकतरपक्षनिर्धारणाय प्रभवामः अयुङ्गायुङ्गान्मुष्टींल्लुनोतीति श्रुत्यर्थस्य विशयित्वादिति भावः ॥ भारद्वाजश्चाह प्रस्तरो युग्म इत्येकेषामयुग्म इत्येकेषामिति ॥

यदन्यत्परिषवणादुत्सर्जनाच्च तत्सर्वंचावर्तते । ६ ।

सर्वत्र सर्वेषु मुष्टिषु दर्भालम्भनाद्यावर्तते ॥

प्रस्तरमेव मन्त्रेण दाति तूष्णीमितरदिति वाजसनेयकम् । ७ ।

इतरन्मुष्टिजातम् ॥

सर्वं लुत्वा देवबर्हिः शतवल्शं विरोहेत्यालवानभिमृशति । ८ ।

लुत्वेति ह्रस्वश्छान्दसः ॥ येषु काण्डेष्वालूना दर्भास्त आलवाः ॥

सहस्रवल्शा वि वयं रुहेमेत्यात्मानम् । ९ ।

गतः ॥

अदित्यै रास्नासीति त्रिधातु पञ्चधातु वा शुल्बं करोति । १० ।

धातुः संधिः । शुल्बमेकसरा रज्जुः यानि शुल्बानि समा संगच्छन्तीति लिङ्गात् ॥ अत्राह भारद्वाजः धातौधातौ मन्त्रमावर्तयतीति । तथा तत एव बर्हिषः शुल्बं करोतीति च ॥

आयुपिता योनिरिति प्रतिदधाति । ११ ।

प्रतिदधाति संदधाति ॥

अदित्यै रास्नासीत्युदगग्रं वितत्य सुसंभृता त्वा संभरामीति तस्मिन्निधनानि संभृत्यालुभिता योनिरित्युत्तमे निधने प्रस्तरमत्याधायेन्द्राण्यै संनहनमिति संनह्यति । १२ ।

निधनानामेकैकस्य संभरणं त्वेत्येकवचनात् ॥

पूषा ते ग्रन्थिं ग्रथ्नात्विति ग्रन्थिं करोति । १३ ।

गतः ॥

स ते मास्थादिति पुरस्तात्प्रत्यञ्चं ग्रन्थिमुपगूहति पश्चात्प्राञ्चं वा । १४ ।

मूलादधः पुरस्ताद्भागेन प्रत्यगगमयति ग्रन्थिं । प्राग्वा पश्चाद्भागेन ॥

आपस्त्वामश्विनौ त्वामृषयः सप्त मामृजुः । बर्हिः सूर्यस्य रश्मिभिरुषसां केतुमारभ इति बर्हिरारभते । इन्द्रस्य त्वा बाहुभ्यामुद्यच्छ इत्युद्यच्छते । बृहस्पतेर्मूर्ध्ना हरामीति शीर्षन्नधिनिधत्ते । १५ ।

आरभते आलभते । शीर्षन् शिरसि ॥

इति चतुर्थी कण्डिका ।

प्रेयमगाद्धिषणा बर्हिरच्छेति...

प्रेयमगादुर्वन्तरिक्षमन्विहीति यौ गमनौ तौ प्रत्यायनौ । १ ।

याभ्यामेताभ्यां प्राग्गमनमुक्तं प्रत्यागमने ऽपि द्वावपि तौ भवतः । न तु क्रमानुसाराद्द्वितीय एवेति भावः ॥

अदित्यास्त्वोपस्थे सादयामीत्यन्तर्वेदि परिधिदेशे ऽनधः सादयति । २ ।

अन्तर्वेदि सादयति । कुत्र प्रदेशे । परिधिदेशे । समीपे सप्तमी चेयं मध्यमपरिधिस्थानसमीप इति ॥

बर्हिरसि देवंगममित्यासन्नमभिमन्त्रयते । ३ ।

गतः ॥

देवंगममसीत्यनधो निदधाति यथा प्रागुपसादयेत् । ४ ।

यथोपसादनकाले प्राचीनमुपसादयितुं योग्यं भवति तथा निदधाति ॥ बर्हिषस्त्वाहरणे ऽनुग्रहमाह बौधायनः आहृतं वा यजुषा करोतीति । कात्यायनश्चाह खातलूनच्छिन्नावहृतपिष्टदुग्धदग्धेषु यजुष्क्रियासंभवादिति ॥

या जाता ओषधयो देवेभ्यस्त्रियुगं पुरा । तासां पर्व राध्यासं परिस्तरमाहरन् ॥ अपां मेध्यं यज्ञियं सदेवं शिवमस्तु मे । आच्छेत्ता वो मा रिषं जीवानि शरदः शतम् ॥ अपरिमितानां परिमिताः संनह्ये सुकृताय कम् । एनो मा निगां कतमच्चनाहं पुनरुत्थाय बहुला भवन्त्विति परिस्तरणानामधि निधान्याच्छेदनी संनहनीति यथालिङ्गम् । ५ ।

यथासंख्येनैव सिद्धे यथालिङ्गवचनं लिङ्गविनियोगमार्गं दर्शयितुं विस्पष्टार्थं वा ॥

खादिरं पालाशं वैकविंशतिदारुमिध्मं करोति । ६ ।

दारुभिन्नं काष्ठं स शकलान् दारूणि वेति दर्शनात् । ब्राह्मणे त्वेकविंशतिरिध्मदारूणि भवन्तीति प्रकृत्य पञ्चदशेध्मदारूण्यभ्यादधाति

त्रीन्परिधीन्परिदधाति ऊर्ध्वे समिधावादधाति अनूयाजेभ्यः समिधमतिशिनष्टीत्येकविंशत्या विभाग उक्तः। तमिदानीं विवक्षुंस्तत्र पञ्चदश सामिधेन्यो दर्शपूर्णमासयोरित्यादिना विभागसिद्धिमुपजीव्यावशिष्टस्य षट्कस्य विभागं दर्शयति ॥

त्रयः परिधयः। ७।

तेषु त्रयः परिधानार्थाः परिधय इति समाख्यानात् ॥

पलाशकार्ष्मर्यखदिरोदुम्बरबिल्वरोहीतकविकङ्कतानां ये वा यज्ञिया वृक्षाः। ८।

ते च पलाशादीनामवयवभूता ग्राह्याः तदभावे ऽन्यस्यापि यज्ञियस्य वृक्षस्य। तत्र पलाशखदिरयोः पुनरुपादानं तौ परिध्यर्थे ऽपि यथा स्यातां नेतरैर्बाध्येयातामिति। रोहीतको वटावान्तरजातिः ॥

आर्द्राः शुष्का वा सत्वक्काः। ९।

आर्द्राः परिधयो भवन्ति शुष्का अपीष्यन्ते न चेद्गलितत्वचो भवन्तीत्यर्थः। अथवा इध्मस्याग्नीन्धनार्थत्वात् अनिन्धनार्थत्वात्परिधीनामार्द्रानुज्ञानार्थमुभयवचनम् ॥

स्थविष्ठो मध्यमो ऽणीयान्द्राघीयान्दक्षिणार्ध्यो ऽणिष्ठो ह्रसिष्ठ उत्तरार्ध्यः। १०।

अर्धशब्दो ऽत्रापि स्थानवाची। दक्षिणार्धभवो दक्षिणार्ध्यः स मध्यमादणुतरो दीर्घतरश्च। तथा सर्वतो ऽणुतमो ह्रस्वतमश्चोत्तरार्ध्यः ॥ आयामस्त्वर्थलक्षणः सर्वेषाम्। तत्र प्रादेशमात्राणीध्मकाष्ठानि बाहुमात्राः परिधय इति तन्त्रान्तरकाराः ॥

द्वे आघारसमिधावनूयाजसमिदेकविंशीति। ११।

अथ द्वे आघारार्थे समिच्छब्दिते च भवतः। तथैकानूयाजार्था। तस्यास्तु पारिशेष्यात्सर्वान्ते विनियोगाच्चैकविंशत्ववादः। इतिकरण एकविंशतिविभागनिगमनार्थः। विभागोपयोगश्चानन्तरसूत्रे दर्शयिष्यते ॥

समूलानामुतेमूलानां वा दर्भाणां पूर्ववच्छुल्वं कृत्वोदगग्रं वितत्य। १२।

इति पञ्चमी कण्डिका।

यत्कृष्णो रूपं कृत्वा प्राविशस्त्वं वनस्पतीन्। ततस्त्वामेकविंशतिधा संभरामि सुसंभृता॥ त्रीन्परिधींस्तिस्रः समिधो यज्ञायुरनुसंचरान्। उपवेषं मेक्षणं धृष्टिं संभरामि सुसंभृतेति शुल्व इध्मं संभरति। १।

समूलामूलवचनं समूलप्राप्त्यर्थम्। अन्यथा हि यत्समूलं तत्पितृणामिति श्रुतेरमूला एव गृह्येरन्। पूर्ववदिति कृत्वा वितत्येत्युभयत्रापि संबध्यते अविशेषात् ॥ अत्र संभरणमन्त्रयोरेकविंशतिधा त्रीन्परिधींस्तिस्रः समिध इति दारुपरिधिसमित्संख्यावाचिनां शब्दानां विकृतिषु दार्वादेर्न्यूनाधिकभावे वा परिधिसमिधामभावे वा तत्तत्संख्यावशेन यथायथं भवत्यूहः। प्रकृतौ तु पञ्चदशकल्पादन्येषु सामिधेनीकल्पेषु प्रथमो मन्त्रो निवर्तते लिङ्गविरोधादूहप्रतिषेधाच्च। काम्य-

नैमित्तिकानां नित्यविकारत्वादूह इति केचित् । तदयुक्तं तूष्णीं कंसं मन्मयं चेति न्यायप्रदर्शनात् ॥ यज्ञायुरनुसंचरशब्दः पुमां स्त्रियेति कृतलिङ्गैकशेषः परिधिसमिधामभिधायकः तेनोपसदादौ परिध्यभावे ऽपि समित्संख्यावशेन यथार्थमूह्यः । उपवेषादेस्तत्समवेताभिधायिन एकविंशतिविभागानन्तर्भूतस्येभार्थवादत्वात्सर्वत्रानूहः ॥

कृष्णो ऽस्याखरेष्ठो देव पुरश्चर सघ्यासं त्वेति संनह्यति । पुरस्तात्प्रत्यञ्चं ग्रन्थिमुपगूहति पश्चात्प्राञ्चं वा । अनधो निदधाति । २ ।

व्याख्याताः ॥

इध्मप्रव्रश्चनानि निदधाति । ३ ।

इध्मच्छेदनप्रभवाः शकला इध्मप्रव्रश्चनानि ॥

त्वया वेदिं विविदुः पृथिवीं त्वया यज्ञो जायते विश्वदानिः । अच्छिद्रं यज्ञमन्वेषि विद्वांस्त्वया होता संतनोत्यर्धमासानिति दर्भाणां वेदं करोति । ४ ।

दर्भाणां दर्भैः ॥

वत्सज्ञुं पशुकामस्य मूतकार्यमन्नाद्यकामस्य चित्रच्छिरसं ब्रह्मवर्चसकामस्य । ५ ।

वत्सज्ञुर्वत्सजान्वाकृतिः । मूतवत्कार्यो मूतकार्यः । मूतं धान्यावपनार्थं तृणपुञ्जसंनिवेशविशेषः । अन्नाद्यं भोज्यं भोजनशक्तिर्वा । चित्रच्छिरास्त्रिगुणशिराः । नित्याखेवाकृतिष्वमी कामाः आकृत्यन्तरस्यानुपदेशात् ॥

मुख्यात्प्रादेशे परिवास्य वेदपरिवासनानि निदधाति । ६ ।

मुख्याद्बन्धनप्रमुखात् । परिवास्य छित्त्वा । वेदपरिवासनानि वेदाग्राणि ॥

अन्तर्वेदि शाखायाः पलाशान्यसर्वाणि प्रशात्य मूलतः शाखां परिवास्योपवेषं करोत्युपवेषो ऽसि यज्ञाय त्वां परिवेषमधारयन् । इन्द्राय हविः कृण्वन्तः शिवः शग्मो भवासि न इति । ७ ।

अन्तर्वेदीति देशोपचारः वेदो वेदिरिति वक्ष्यमाणपक्षाभिप्रायं वा । प्रशात्य भङ्क्त्वा । मूलतः परिवास्य तदेव मूलमुपवेषं करोति । अङ्गारप्रेषणार्थं काष्ठमुपवेष इति समाख्यायते स च सांनाय्यार्थमुत्पन्नः प्रमुखात्पुरोडाशस्याप्युपकरोति । यस्तु न संनयति तस्यान्यत उत्पाद्यः उपवेषं प्रातर्दोहपात्राणीति लिङ्गात् । तत्र ह्युपवेषवचनमसंनयदर्थं संनयतः प्रातर्दोहपात्राणीत्यनेनैव सिद्धत्वात् ॥ भारद्वाजस्त्वाह चोद्यमाने कर्मणि द्रव्यमुत्पादयेत् यथा पौर्णमास्यामुपवेष इति । बौधायनस्त्वाह पौर्णमास्यामुपवेषकरण इति कुर्यादिति बौधायनो न कुर्यादिति शालीकिरिति ॥ मन्त्रे त्विन्द्राय हविः कृण्वन्त इति परकृतिवादेनोपवेषः स्तूयते तस्मादविकारः ॥

तृतीयस्यै दिवो गायत्रिया सोम आभृतः । सोमपीथाय संनयितुं वक्तलमन्तरमाददे इति परिवासनशकलमादाय प्रज्ञातं निदधाति । ८ ।

लिङ्गादादाने मन्त्रः । तूष्णीं निधानं । स च पर्णशकलाभिधायी तल्लिङ्गत्वात् तृतीयस्यामितो दिवि सोम आसीदिति च पर्णार्थवादसालिङ्ग्यात् पर्णवल्कः पवित्रं पर्णवल्कमुत शुन्धतेति तद्विषयमन्त्रान्तरलिङ्गाच्च । तेन शमीशकले निवर्तते । तथा चोत्तरसूत्रे स्पष्टं भविष्यति ॥

त्रिवृद्दर्भमयं पवित्रं कृत्वा वसूनां पवित्रमसीति शाखायां शिथिलमवसजति मूले मूलान्यग्रेऽग्राणि । न ग्रन्थिं करोति । ९ ।

प्रादेशमात्रं पवित्रं प्रादेशसंमित इति मन्त्रलिङ्गात् । शाखाया मूले दर्भाणां मूलान्यवसजति अग्रेऽग्राणि । न तु तया सह बध्नाति ॥

त्रिवृत्पलाशे दर्भ इयान्प्रादेशसंमितः । यज्ञे पवित्रं पोतृतमं पयो हव्यं करोतु मे ॥ इमौ प्राणापानौ यज्ञस्याङ्गानि सर्वशः । आप्याययन्तौ संचरतां पवित्रे हव्यशोधन इति क्रियमाणे यजमानोऽनुमन्त्रयते । १० ।

क्रियमाणे व्यतिषज्यमाणे शाखां च पवित्रं चोभे अप्यनुमन्त्रयत इत्यर्थः इमौ प्राणापानाविति लिङ्गात् । पलाशलिङ्गत्वान्मन्त्रः शम्या निवर्तेत न चाविशेषवचनादनिवृत्तिर्युक्ता पलाशशब्देन शम्यभिधानानुपपत्तेः प्रकृतावूहप्रतिषेधाच्च । तथा च न्यायं प्रदर्शयिष्यति तूष्णीं यवमयमिति ॥

समूहन्त्यग्न्यगारमुपलिम्पन्त्यायतनानि । ११ ।

समूहन्ति संमृजन्ति सर्वमग्न्यगारम् । अग्न्यायतनानि परितो लिम्पन्ति

सगोमयाभिरद्भिः ॥ बहुवचनमध्वर्य्वादीनामन्यतमप्राप्त्यर्थम् । कुतः । एकेन कृते समूहने ऽन्येन पुनःकरणायोगात् । यथा परिस्तृणीत व्रतं कृणुताग्नीन्प्रज्वलयन्तीत्यादौ परिस्तरणादेः ॥

अलंकुर्वाते यजमानः पत्नी च । १२ ।

एवमग्नीनलंकृत्य स्वयमप्यलंकृतौ भवत इत्यर्थः । अन्ये त्वयमप्यग्न्यलंकारविधिरिति मन्यन्ते । तदयुक्तं विहितस्य विधानायोगात् ततोऽन्यस्याग्न्यलंकारस्याभावाच्च यथा वक्ष्यति परिसमूहनेनाग्नीनलंकुर्वन्तीति । तथा कर्त्रभिप्रायार्थादात्मनेपदादप्यवगच्छामः कर्तृसंस्कारोऽयं नान्यसंस्कार इति । स्यान्मतं अग्निसंस्कारत्वे ऽप्यदृष्टद्वाराकरणानुग्राहकत्वेन कर्त्रभिप्रायत्वोपपत्तेः उपपन्नमेवात्मनेपदमिति । तन्मन्दं तथाविधेष्वपि परगोचरेषु द्रव्यसंस्कारेषु परस्मैपददर्शनादात्मगोचरेषु विपर्ययदर्शनाच्च यथाग्नीनलंकुर्वन्ति पुरोडाशानलंकुरु दारं प्रत्यलंकुर्वीत सर्वान्ग्रहानभिमृशति व्रतयित्वा नाभिदेशमभिमृशति यथालिङ्गमङ्गानि संमृशति पुनात्येवाग्निं पुनीत आत्मानं द्वाभ्यामित्यादि ॥ व्यक्तोक्तं चैतद्भारद्वाजेन यथा परिसमूहन्त्यग्न्यगाराणि उपलिम्पन्त्यायतनानि यावच्छर्करं सांनाय्यकुम्भ्यौ गोमयेनालिप्ते भवतः अलंकुर्वाते यजमानः पत्नी चेति । बौधायनश्चाह स्नायादाङ्क्तेऽभ्यङ्क्तेति तथोपवसथ्ये ऽहनीत्यधिकृत्य स्मृतं पैठीनसिना अलंकृतो ऽभ्यक्तो गन्धपुष्पाणि सेवेतेति ॥

नवे सांनाय्यकुम्भ्यौ यावच्छर्करं गोमयेनालिप्ते भवतः । १३ ।

यावज्जीवंपात्रधारणवचनान्नवे इति प्रथमप्रयोगविषयमिति केचित्। यावच्छर्करं यावानंश उपरिष्टाच्छर्कराभिरभिरञ्जितः कुलालैः आ तावतो ऽंशादित्यर्थः ॥

इति षष्ठी कण्डिका।

इति द्वितीयः पटलः ॥

अमावास्यायां यदहश्चन्द्रमसं न पश्यन्ति तदहः पिण्डपितृयज्ञंकुरुते। १।

पिण्डैर्युक्तः पितॄणां यज्ञः पिण्डपितृयज्ञः स च कर्मान्तरं न तु दर्शशेषः यथा वक्ष्यति पितृयज्ञः स्वकालविधानादनङ्गं स्यादिति। तन्मध्योपदेशस्तु पक्षे तत्कालमध्यपातात्। तं च यदहश्चन्द्रमसं न पश्यन्ति पञ्चदश्यां प्रतिपदि वा तदहः कुरुते। यदहस्तयोः संधिस्तदहरित्यर्थः ॥ तथा दृश्यमाने ह्युपोष्य श्वोभूते यजत इति सत्याषाढः ॥

अपराह्णे ऽधिवृक्षसूर्ये वा पिण्डपितृयज्ञेन चरन्ति। २।

नवधाकृतस्याह्नः सप्तमो भागो ऽपराह्णः तथा देवस्य सवितुः प्रातरित्यनुवाके विवेचनात्। पृथिवीं मुक्त्वा वृक्षाणामुपर्येव यस्मिन्काले सूर्यरश्मयो निविशन्ते सो ऽधिवृक्षसूर्यः कालः। चरन्तीति बहुवचनं पत्न्यपेक्षया ॥ तत्र यदौपवसथ्ये ऽहनि चरन्ति तदान्वाहित एवाग्नौ प्रयोगः। अन्यथा दक्षिणाग्निं योनित उत्पादयेत् नाहवनीयं अर्थाभावात्। न च विद्युदसीत्यपामुपस्पर्शनं दर्वि-

होमत्वात्। पितृयज्ञवत्सर्वधर्माः प्राचीनावीतादयः सर्वंच। वचनात्तु विपर्ययः ॥

अपां मेध्यं यज्ञियमिति समूलं सकृदाच्छिन्नं बर्हिराहरति। ३।

सकृदेकव्यापारेण यावदेवाच्छिन्नं तावदेवाहरति समूलं च। तत्र छेदने मन्त्रः तल्लिङ्गत्वात् अन्यत्रापि छेदने दृष्टविनियोगत्वाच्च ॥

सकृदाच्छिन्नानि वा तृणान्युपमूलं दिनानि। ४।

अथवा मूलादूर्ध्वं दिनान्यवखण्डितानि सकृदाच्छिन्नान्येव दर्भतृणान्याहरति। दर्भादन्यान्यपि यज्ञियानि तृणानीत्येके ॥

दक्षिणा प्रागग्रैर्दर्भैर्दक्षिणमग्निं परिस्तीर्य दक्षिणतः पश्चाद्वा दर्भान्संस्तीर्य दक्षिणाप्राञ्चेकैकशः पिण्डपितृयज्ञपात्राणि प्रयुनक्ति स्फ्यं मेक्षणं कृष्णाजिनमुलूखलं मुसलं शूर्पमाज्यस्थालीं चरुस्थालीं येन चान्येनार्थी भवति। ५।

पश्चात्पुरस्ताच्च दक्षिणाग्रैः प्रागग्रैरितरैरित्यर्थः। दक्षिणाप्राञ्चीति कोणदिगपवर्गवादः। येन चान्येनार्थी प्रयोजनवान्भवति तदपि प्रयुनक्ति यथोपस्तरणार्थां दर्वीं निर्वापार्थं स्रुक्षयं पात्रं कशिपूपबर्हणादीनि च ॥

दक्षिणतः प्रागीषं व्रीहिमच्छकटमवस्थितं भवति। ६।

गतः ॥

अध्वर्युरुपवीती स्थालीमेकपवित्रेणान्तर्धाय तया दक्षिणतः शकटादधि निर्वपत्युत्तरतो वा । ७ ।

उपवीती भूत्वा दक्षिणतः शकटस्य दक्षिणार्धादाथ कस्मिंश्चित्पात्रे निर्वपति शकटान्निष्कृष्य वपतीति व्रीहीन् । प्राचीनावीत्येव वा समुत्तरतः ॥ अध्वर्युवचनं विस्पष्टार्थं अनाहिताग्नेरप्यध्वर्युकर्तृकत्वासंदेहार्थं वा ॥

तां पूरयित्वा निमार्ष्टि । ८ ।

तां स्थालीं पूरयित्वोपरिगतान्व्रीहीन्प्रोह्य स्थालीमुखं समीकरोतीत्यर्थः ॥

मृन्मये निर्वपति पितृभ्यो वो जुष्टं निर्वपामीति तूष्णीं वा । ९ ।

ततो मृन्मये पात्रे निर्वपति ॥

अपरेणान्वाहार्यपचनं प्रत्यगुदग्ग्रीवे कृष्णाजिन उलूखले प्रतिष्ठिते दक्षिणाप्राची तिष्ठन्ती पत्न्यवहन्ति परापावमविवेकम् । १० ।

तिष्ठन्त्येव पत्न्यवहन्ति नासीना । परापावं परापूयपरापूय । अविवेकं अविविच्याविविच्य । शूर्पेण तुषप्रोहणं परापवनम् । सतुषवितुषाणां पृथक्करणं विवेकः ॥

सकृत्फलीकरोति । ११ ।

फलीकरणं नाम कणापाकरणार्थस्तण्डुलावघातः । तमपि पत्नी सकृत्करोति सकृत्तानोप्यावहत्योप्तान्न पुनरुपावहन्यादित्यर्थः ॥

दक्षिणाग्नौ जीवतण्डुलं श्रपयति । १२ ।

यथा ईषत्तण्डुला जीवन्ति तथा श्रपयत्यध्वर्युः ॥

अपहता असुरा रक्षांसि पिशाचा वेदिषद इत्यन्तरा गार्हपत्यान्वाहार्यपचनौ दक्षिणापूर्वेण वान्वाहार्यपचनं दक्षिणाप्राचीमेकस्फ्यां पराचीं वेदिमुद्धत्य शुन्धन्तां पितर इत्यद्भिरवोक्ष्यायन्तु पितरो मनोजवस इत्यभिमन्त्र्य सकृदाच्छिन्नं बर्हिरूर्णाम्रदु स्योनं पितृभ्यस्त्वा भराम्यहम् । अस्मिन्सीदन्तु मे पितरः सोम्याः पितामहाः प्रपितामहाश्चानुगैः सहेति सकृदाच्छिन्नेन बर्हिषा वेदिं स्तृणाति । १३ ।

एकस्फ्यकृता लेखैकस्फ्या सा वेदिर्भवति । तां पराचीमपरावृत्तामुद्धृत्य सकृदेवाभिलिखेदित्यर्थः । अवाचीनेन करेणोक्षणमवोक्षणम् ॥

इति सप्तमी कण्डिका ।

उत्पूतेन नवनीतेनानुत्पूतेन वा सर्पिषा स्थालीपाकमभिघार्यैकस्फ्यायां मेक्षणमासाद्य स्थालीपाकमासादयति । १ ।

नवनीतकल्पे हविरुपस्तरणाभिघारणे अपि तेनैव भवत इत्येके ॥

दक्षिणतः कशिपूपबर्हणमाञ्जनमभ्यञ्जनमुदकुम्भमित्येकैकश आसादयति। २।

एतानि च वेद्यामेव सादयति। दक्षिणतः स्थालीपाकस्य। कशिपुप्रयनीयमुपबर्हणमुपधानम् ॥

अध्वर्युरुपवीती दक्षिणं जान्वाच्य मेक्षण उपस्तीर्य तेनावदायाभिघार्य सोमाय पितृपीताय स्वधा नम इति दक्षिणाग्नौ जुहोति। ३।

अध्वर्युवचनं पूर्ववत्। उपवीतीति प्राचीनावीतापवादः। दक्षिणं जान्वाच्येति दर्विहोमत्वादेव सिद्धस्य वचनं अनाच्य वेति विकल्पनिवृत्त्यर्थम्। आच्य संकोच्य भूमौ निपात्येत्यपरम्। मेक्षणेनावदाय तेनैव स्वाहाकारान्तैर्मन्त्रैर्जुहोति चोदनत्वात् अग्नये कव्यवाहनाय स्वधा स्वाहेति लिङ्गाच्च बौधायनीये च स्वाहाकारान्तानामेव पाठाच्च ॥

यमायाङ्गिरस्वते पितृमते स्वधा नम इति द्वितीयाम्। अग्नये कव्यवाहनाय स्वधा नम इति तृतीयाम्। ४।

आहुतिं जुहोतीति शेषः ॥

ये मेक्षणे तण्डुलास्तान्हुत्वा तूष्णीं मेक्षणमादधाति। ५।

ये मेक्षणे पूर्वाहुत्योः संश्लिष्टास्तण्डुलाः जीवतण्डुलत्वादोदनस्य तथा व्यपदेशः। तानेव तृतीयामाहुतिमग्नये कव्यवाहनाय हुत्वा मेक्षणमग्नौ तूष्णीं प्रहरतीत्यर्थः॥ नैवमत्र भ्रमितव्यं ये मेक्षण इत्यादिना चतुर्थ्याहुतिस्तूष्णीकोच्यत इति तिस्र आहुतीरिति श्रुतेः। न च वाच्यं सन्तु तास्तिस्रः प्रधानाः स्विष्टकृदर्थैषा चतुर्थी भविष्यतीति तृतीयस्या एवाहुतेस्तदर्थत्वात्। यथाग्निं कव्यवाहनं यजतीति प्रकृत्याह ब्राह्मणं अथो यथाग्निं स्विष्टकृतं यजति तादृगेव तदिति। निगदव्याख्यातमेतद्धिरण्यकेशिनेति द्रष्टव्यम् ॥

न यमाय जुहोतीत्येके। ६।

गतः ॥

अपयन्त्वसुराः पितृरूपा ये रूपाणि प्रतिमुच्याचरन्ति। परापुरो निपुरो ये भरन्त्यग्निष्टांल्लोकात्प्रणुदात्यस्मात् ॥ ये देवाः पितरो ये च मानुषा ये गर्भे मम्रुत ये परास्ताः। य उद्धता उत ये निखातास्ते सम्यञ्च इह मादयन्ताम् ॥ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति। परापुरो निपुरो ये भरन्त्यग्निष्टांल्लोकात्प्रणुदात्यस्मात् ॥ ये ज्ञातीनां प्रतिरूपाः पितॄन्माययासुराः प्रविष्टाः। परापुरो निपुरो ये भरन्त्यग्ने तानस्मात्प्रणुदस्व लोकादिति दक्षिणाग्नेरेकोल्मुकं धूपायद्धरति। ७।

एकमुल्मुकमेकोल्मुकम्। धूपायत् धूमायमानम्॥

दक्षिणपूर्वमवान्तरदेशं सकृत्स्फ्येनोल्लिख्योदीरताम-वर इत्यङ्गिरवोक्ष्योल्लिखितान्ते निदधाति।८।

अवान्तरदेशः कोणदिक्॥

यजमानो ऽत ऊर्ध्वं प्राचीनावीती कर्माणि करोति।९।

अतः परं यजमानः कर्ता भवति प्राचीनावीती च। अत एव वच-नादितः पूर्वमुपवीत्येव भवति॥

मार्जयन्तां मम पितरो मार्जयन्तां मम पितामहा मार्जयन्तां मम प्रपितामहा इत्येकस्फ्यायां त्रीनुदका-ञ्जलीन्निनयति।१०।

उदकपूर्णो ऽञ्जलिरुदकाञ्जलिः। तांस्त्रीनुदकाञ्जलीन्वेद्यामासिञ्चति॥

प्रसव्यं वा त्रिः परिषिञ्चति।११।

तैरेवाञ्जलिभिः परिषिञ्चति परितः सिञ्चत्येकस्फ्याम्॥

त्रीनुदपात्रान्वाजसनेयिनः समामनन्ति।१२।

अञ्जलिस्थाने पात्रमेव भवति। समानमन्यत्॥

इत्यष्टमी कण्डिका।

सव्यं जान्वाच्यावाचीनपाणिः सकृदाच्छिन्ने बर्हिषि दक्षिणापवर्गान्पिण्डान्ददात्येतत्ते ततासौ ये च त्वाम-न्वित्येतैः प्रतिमन्त्रम्।१।

मन्त्रेष्वदसां स्थाने पित्रादिनामानि संबुद्ध्या गृह्णाति॥

तूष्णीं चतुर्थम्।२।

तस्याञ्जलिरपि तूष्णीं भवति॥

स कृताकृतः।३।

चतुर्थः पिण्डः कचिच्छाखायां विहितः कचिचाविहितः वैकल्पिक इति यावत्॥

प्रपितामहप्रभृतीन्वा।४।

पिण्डान्ददातीत्यन्वयः। प्रदानेषु प्रपितामहः प्रभृतिरादिर्येषां ते प्रपितामहप्रभृतयः। प्रपितामहशब्देन च तत्पिण्डलक्षणा। ते च मन्त्रक्रमप्रातिलोम्येन दक्षिणापवर्गा एव भवन्ति। पिण्डशेषत्वादञ्ज-लयो ऽपि तत्प्रभृतय एव स्युः॥

नानामगृहीतं गच्छति।५।

नामगृहीतं नामग्रहणं तद्रहितमनामगृहीतं तद्दानं देयं वा पिण्डादि पितॄन्न प्राप्नोति। तस्मादवश्यं ग्राह्यं नामेति॥

यदि बन्धू न विद्यात्स्वधा पितृभ्यः पृथिविषद्भ्य इति प्रथमं पिण्डं दद्यात्। स्वधा पितृभ्यो ऽन्तरिक्षसद्भ्य इति द्वितीयम्। स्वधा पितृभ्यो दिविषद्भ्य इति तृतीयम्।६।

बन्धुनामशब्दौ पर्यायौ। अथवा बन्धू नामतो न जानीयादित्यर्थः॥

यदि द्विपिता स्यादेकैकस्मिन्पिण्डे द्वौद्वावुपलक्षयेत्।७।

पितृशब्देनात्र पितृपितामहप्रपितामहानां त्रयाणां ग्रहणम्। तेष्वन्यतमो द्वौ यस्य क्षेत्रजादेः स द्विपिता। कुत एतत्। एकैकस्मिन्पिण्डे द्वौद्वाविति वीप्सावचनान्न्यायसाम्याच्च। उपलक्षयेत् नामभ्यां कीर्तयेत् यथा एतद्वां ततौ सूर्यविष्णू ये च युवामन्वित्यादि॥

यदि जीवपिता न दद्यादा होमान्त्कृत्वा विरमेत्।८।

पितृशब्दः पूर्ववद्व्याख्येयः। त्रयाणामन्यतमजीवने ऽपि पित्रादित्रयसंप्रदानपिण्डप्रदानविरोधसाम्यात् शास्त्रान्तरेषु व्यक्तत्वाच्च। तदयमर्थः त्रिष्वपि पित्रादिषु मध्ये यदि कश्चिज्जीवेत्तदा न दद्यात्पिण्डान् होमान्तमेव कृत्वा कर्म समाप्नुयादिति॥ अत्र सूत्रान्तरकारैर्जीवपितुः पिण्डदानं प्रत्यनेके कल्पा विकल्पेनोपदिष्टाः येभ्य एव पिता ददाति तेभ्यः पुत्रो ददाति न जीवन्तमतिददातीत्येक इत्यादयः। कात्यायनेन तु कर्मण एवारम्भो विकल्पितः जीवत्पितृकस्य होमान्तमनारम्भो वेति। सर्वेषूपात्तः प्रायशो होमान्तकल्पः। तमेवैकं कल्पमभिरोचितवानित्याचार्यस्तामन्यत्॥

यन्मे माता प्रममाद यच्चचारानुव्रतम्। तन्मे रेतः पिता वृङ्क्तामाभुरन्योपपद्यतां पितृभ्यः स्वधा विभ्यः स्वधा नमः पितामहेभ्यः स्वधा विभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधा विभ्यः स्वधा नम इत्युपस्थायाच पितरो यथाभागं मन्दध्वमित्युक्त्वा पराङावर्तते।९।

प्रथमस्योपस्थानमन्त्रस्याावृत्तिरूहश्च पितामहप्रपितामहयोर्मासिश्राद्धे तथादर्शनात् तथालिङ्गविरोधाच्च। न च पितृशब्देन त्रयाणामभिधानादपि नोह इति वाच्यं एकवचनान्मातृशब्दसमभिव्याहाराच्च। तस्मादूहः। पितुरेवोपस्थानं प्रथमेन॥

आोष्मणो व्यावृत उपास्ते।१०।

व्यावृत् व्यावृत्तिः सा च उद्गच्छत ऊष्मणो न त्वान्तरस्यापि वीतोष्मसु पिण्डेष्वित्युत्तरत्रवचनात्॥

अमीमदन्त पितरः सोम्या इति व्यावृत्त ऊष्मण्यभिपर्यावर्तते ऽव्यावृत्ते वा।११।

व्यावृत्त्यव्यावृत्त्योरन्यतो ऽवगमः पराङ्मुखत्वादात्मनः॥

यः स्थाल्यां शेषस्तमवजिघ्रति ये समानाः समनसः पितरो यमराज्ये। तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पतां वीरं धत्त पितर इति।१२।

गतः॥

आमयाविना प्राश्यो ऽन्नाद्यकामेन प्राश्यो यो ऽलमन्नाद्याय सन्नाद्यात्तेन वा प्राश्यः।१३।

आमयाविना तु यजमानेन प्राश्यो नावघ्रेयः। अन्नाद्यं व्याख्यातम्। यो ऽलमन्नाद्याय सन्नन्नवत्तया भोजनाय पर्याप्तः सन्नाद्यात् भोक्तुं क्षमते सत्येव भोज्ये भुक्तिशक्तिपूर्त्य इत्यर्थः॥

पूर्ववदेकस्फ्यायां त्रीनुदकाञ्जलीनुपनिनीयाञ्जनाभ्यञ्जने वासश्च त्रिरनुपिण्डं ददाति।१४।

आञ्जनादिचर्यं चिरनुपिण्डं ददाति पिण्डेपिण्डे चिस्त्रिर्ददातीत्यर्थः अन्यथा चिर्ग्रहणवैयर्थ्यात् ॥

आङ्क्ष्व ततासावाङ्क्ष्व पितामहासावाङ्क्ष्व प्रपितामहासावित्याञ्जनम्। १५।

ददातीति शेषः। तच सकृत्सकृन्मन्त्रः। पिण्डेषु द्विपितुरूहस्य पूर्ववत् ॥

एवमभ्यञ्जनमभ्यङ्क्ष्वेति मन्त्रं संनमति। १६।

गतः ॥

यदि नामानि न विद्यादाञ्जतां मम पितर आञ्जतां मम पितामहा आञ्जतां मम प्रपितामहा इत्याञ्जनम्। एवमभ्यञ्जनमभ्यञ्जतामिति मन्त्रं संनमति। १७।

पित्रादिषु मध्ये यस्ययस्य नाम न विद्यात्तस्यतस्य यथालिङ्गं स स मन्त्रो भवति ॥

इति नवमी कण्डिका।

एतानि वः पितरो वासांस्यतो नोऽन्यत्पितरो मा योष्टेति वाससो दशां छित्त्वा निदधात्यूर्णास्तुकां वा पूर्वे वयसि। उत्तर आयुषि स्वं लोम। १।

अनूह्यो मन्त्रः पितर इति सर्वत्र पित्रभिधानात्। आवर्त्यस्त्वविभुलात्कर्मणः। बौधायनस्त्वहमाह यथा एतानि वः पितामहा

वासांस्येतानि वः प्रपितामहा वासांसीति ॥ दशा वाससोऽन्तम्। ऊर्णानामविलोम्नां कलाप ऊर्णास्तुका। स्वं लोम यदूर्ध्वं नाभेस्तदेवेष्यते ऊर्ध्वं वै पुरुषस्य नाभ्यै मेध्यमवाचीनममेध्यमिति श्रुतेः ॥ तत्रार्धपुरुषायुषो ऽपेक्षयायुषः पूर्वोत्तरत्वं बोद्धव्यम्। तथा च पञ्चाशद्वर्षतायाः ऊर्ध्वं स्वं लोमेत्याश्वलायनः ॥ अथवा तृतीयमायुर्वार्द्धकाख्यमुत्तरम्। तथा च बौधायनः ऊर्ध्वं षट्षष्टेश्च वर्षेभ्यो ऽष्टभ्यश्च मासेभ्य इति ॥ चतुर्थपिण्डकल्पे तस्मिन्नपि तूष्णीमाञ्जनादि ददाति ॥

वीतोष्मसु पिण्डेषु नमो वः पितरो रसायेति नमस्काराञ्जपति। २।

नमस्कारानिति वचनं मन्त्राणां नमस्कारार्थज्ञापनार्थम्। तेन नमस्कुर्वञ्जपति। तथा च ब्राह्मणं नमस्करोति नमस्कारो हि पितॄणामिति ॥

गृहान्नः पितरो दत्त सदो वः पितरो देष्मेति पितॄनुपतिष्ठते। ३।

गतः ॥

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधा स्थ तर्पयत मे पितॄनित्युदकं निनयति। ४।

उदकुम्भान्निनयत्येकस्फ्यायाम् ॥

मनो न्वाहुवामह इति मनस्वतीभिरुपतिष्ठते। ५।

मनस्वत्यस्तिस्रः ॥

उत्तिष्ठत पितरः प्रेत शूरा यमस्य पन्थामनुवेता पुराणम्। धत्तादस्मासु द्रविणं यच्च भद्रं प्र णो ब्रूताद्भागधां देवतास्विति पितॄनुत्थापयति। ६।

तादर्थ्येन मन्त्रोच्चारणमेवोत्थापनम् ॥

परेत पितरः सोम्या इति प्रवाहण्या पितॄन्प्रवाहयति। ७।

प्रवाह्यन्ते प्रस्थाप्यन्ते ऽनया पितर इति प्रवाहणी ॥

प्रजापते न त्वदेतानीति यज्ञोपवीती गार्हपत्यदेशं गच्छति। ८।

उभयमेतद्गार्हपत्योपस्थानार्थं यज्ञोपवीतं गमनं च। तेनोपस्थानान्तमिष्यते यज्ञोपवीतम् ॥

यदन्तरिक्षमिति पङ्क्त्या गार्हपत्यमुपतिष्ठते। ९।

पङ्क्तित्वमस्याश्चित्यं शक्वरीत्वं त्वक्षरपरिमाणात् ॥

अपां त्वौषधीनां रसं प्राशयामि भूतकृतं गर्भं धत्स्वेति मध्यमं पिण्डं पत्न्यै प्रयच्छति। १०।

द्वितीयपिण्ड एवात्र मध्यमो ऽभिप्रेतः न तृतीयः चतुर्थस्यानित्यत्वात् ॥ पिण्डप्राशनं च पत्नीसंस्कारः गर्भं धत्स्वेति लिङ्गात् पुमांसं ह जानुकेति स्तुतेश्च। अतः पत्नीबहुत्वे विभज्य सर्वाभ्यः प्रयच्छति दानमन्त्रश्चावर्तते ॥

आधत्त पितरो गर्भं कुमारं पुष्करस्रजम्। यथेह पुरुषो ऽसदिति तं पत्नी प्राश्नाति। पुमांसं ह जानुका भवतीति विज्ञायते। ११।

जानुका जननशीला ॥

ये सजाताः समनसो जीवाजीवेषु मामकाः। तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समा इत्यवशिष्टानामेकं यजमानः प्राश्नाति। न वा। १२।

गतौ ॥

स्थाल्यां पिण्डान्समवधाय ये समाना इति सकृदाच्छिन्नमग्नौ प्रहरति। १३।

समवधाय सह क्षिप्त्वा। ये समाना इत्यृचैव बर्हिः प्रहरति। न वीरं धत्तेति यजुषापि तस्या एवादिप्रदेशात् ॥

अभून्नो दूतो हविषो जातवेदा अवाड्ढव्यानि सुरभीणि कृत्वा। प्रादाः पितृभ्यः स्वधया ते अक्षन्प्रजानन्नग्ने पुनरप्येहि देवानित्येकोल्मुकं प्रत्यपिसृज्य प्रोक्ष्य पात्राणि द्वन्द्वमभ्युदाहरति। १४।

प्रत्यपिसृज्य पुनः क्षिप्त्वाभ्युदाहरति उपादत्ते ॥

संतिष्ठते पिण्डपितृयज्ञः। १५।

गतः ॥

अपः पिण्डानभ्यवहरेद्ब्राह्मणं वा प्राशयेत् । १६ ।

अपो ऽभ्यवहरेत् अप्सु चिपेत् ॥

सो ऽयमेवंविहित एवानाहिताग्नेः । १७ ।

एवंविहित एवायमन्यूनाधिकः पिण्डपितृयज्ञो ऽनाहिताग्नेरपि भवतीत्यर्थः । अथवानाहिताग्नेरप्ययमेवंविहित एव न केवलमाहिताग्नेरित्यर्थः ॥

औपासने श्रपणधर्मा होमश्च । १८ ।

तस्य दक्षिणाग्निस्थानीय औपासने श्रपणहोमौ भवतः ॥

अतिप्रणीते वा जुहुयात् । १९ ।

औपासन एव श्रपयित्वा ततो ऽग्निं दक्षिणाप्राञ्चं प्रणीय तस्मिन्वा जुहुयादित्यर्थः । तथा चाश्वलायनः नित्ये श्रपयित्वातिप्रणीय जुहुयादिति ॥

यस्मिञ्जुहुयात्तमुपतिष्ठेत । २० ।

यस्मिन्नौपासने ऽतिप्रणीते वा जुहुयात्तमेव यदन्तरिक्षमित्युपतिष्ठेत ॥

तत्र गार्हपत्यशब्दो लुप्येत संस्कारप्रतिषेधात् । २१ ।

तत्र त्वग्नावुपस्थीयमाने मन्त्रगतो गार्हपत्यशब्दो लुप्येत । कुत इति चेत् । संस्कारप्रतिषेधात् । नञ प्रतिषेधशब्देनाभावलक्षणा । गार्हपत्यशब्दस्याधानसंस्कारनिमित्तकत्वात्तस्य चाग्नेस्तदभावादित्यर्थः ॥ अनाहिताग्निर्मासिश्राद्धं पिण्डपितृयज्ञं चोभयं करोति । आहिताग्नेर्मासिश्राद्धनिवृत्तिर्मनुनोक्ता यथा न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मन इति । ननु विपरीतमपि मानवाः पठन्ति यथा पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षये ऽग्निमान् पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकमिति । सत्यम् । अत एव विरोधाद्विकल्पो भविष्यति । केचित्त्वेवमविरोधं नयन्ति । पितृयज्ञं तु निर्वर्त्येत्येतद्ब्राह्मणभोजनात्मकं श्राद्धं विदधाति न दर्शेनेत्येतद्धोमपिण्डात्मकं प्रतिषेधतीति ॥ तथा च नैगमाः आहिताग्नेः पित्रर्चनं पिण्डैरेव ब्राह्मणानपि भोजयेत्पूर्वं श्रुतेरिति ॥

इति दशमी कण्डिका ।

इति तृतीयः पटलः ॥

अमावास्यायां रात्र्यां स्वयं यजमानो यवाग्वाग्निहोत्रं जुहोत्यग्निहोत्रोच्छेषणमातञ्चनार्थं निदधाति । १ ।

अथ सांनाय्यमारभ्यते ॥ तत्रामावास्याशब्देन कर्मोच्यते न कालः कर्माधिकारात् यथा पञ्चहोत्रामावास्यामित्यादौ ॥ तस्यां च सायमग्निहोत्रस्य नियमविशेषो विधीयते यवाग्वा स्वयं जुहोतीति । तत्र यवागूः सांनाय्यप्रयुक्ता अग्निहोत्रोच्छेषणमभ्यातनक्तीत्यातञ्चनसंयोगात् । न चेयमुच्छेषणप्रतिपत्तिरिति सांप्रतं उच्छेषणाभावे प्रतिनिध्युपदेशात् । नहि प्रतिपत्तिकर्मसु द्रव्यान्तरागमनं न्यायविदो विषहन्ते न चैवमुच्छेषणनाशे ऽग्निहोत्रावृत्तिः प्रतिनिधिनियमात् ॥ बौधायनस्त्वाह स यद्यग्निहोत्रोच्छेषणात्प्रमाद्येत्पुनरेवाग्निहोत्रं जुहु-